# Shri Gangadashakam

# શ્રીગઙ્ગાદશકમ્

## Document Information

Text title : gangAdashakam

File name : gangAdashakam.itx

Category : devii, puShpAshrIvatsan, nadI, devI, dashaka

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Stotra Pushapavali

Latest update : June 22, 2021

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

June 22, 2021

*sanskritdocuments.org*

# શ્રીગઙ્ગાદશકમ્

ૐ

શ્રીરામજયમ્ ।

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ૐ મોક્ષોપાયાય વિદ્મહે । માઙ્ગલ્યાયૈ ચ ધીમહિ ।
તન્નો ગઙ્ગા પ્રચોદયાત્ ॥

ધ્યાનમ્-
નમસ્તુભ્યં વરે ગઙ્ગે મોક્ષસૌમઙ્ગલાવહે ।
પ્રસીદ મે નમો માતર્વસ મે સહ સર્વદા ॥

ગઙ્ગા ભાગીરથી માતા ગોમુખી સત્સુદર્શિની ।
ભગીરથતપઃપૂર્ણા ગિરીશશીર્ષવાહિની ॥ ૧॥

ગગનાવતરા ગઙ્ગા ગમ્ભીરસ્વરઘોષિણી ।
ગતિતાલસુગાપ્લાવા ગમનાદ્ભુતગાલયા ॥ ૨॥

ગઙ્ગા હિમાપગા દિવ્યા ગમનારમ્ભગોમુખી ।
ગઙ્ગોત્તરી તપસ્તીર્થા ગભીરદરિવાહિની ॥ ૩॥

ગઙ્ગાહરિશિલારૂપા ગહનાન્તરઘર્ઘરા ।
ગમનોત્તરકાશી ચ ગતિનિમ્નસુસઙ્ગમા ॥ ૪॥

ગઙ્ગાભાગીરથીયુક્તાગમ્ભીરાલકનન્દભા ।
ગઙ્ગા દેવપ્રયાગા મા ગભીરાર્ચિતરાઘવા ॥ ૫॥

ગતનિમ્નહૃષીકેશા ગઙ્ગાહરિપદોદકા ।
ગઙ્ગાગતહરિદ્વારા ગગનાગસમાગતા ॥ ૬॥

ગતિપ્રયાગસુક્ષેત્રા ગઙ્ગાર્કતનયાયુતા ।
ગતમાનવપાપા ચ ગઙ્ગા કાશીપુરાગતા ॥ ૭॥

ગહનાઘવિનાશા ચ ગત્યુત્તમસુખાવની ।
ગતિકાલીનિવાસા ચ ગઙ્ગાસાગરસઙ્ગતા ॥ ૮॥

ગઙ્ગા હિમસમાવાહા ગમ્ભીરનિધિસાલયા ।
ગદ્યપદ્યનુતાગીતા ગદ્યપદ્યપ્રવાહિણી ॥ ૯॥

ગાનપુષ્પાર્ચિતા ગઙ્ગા ગાહિતાગહ્વગહ્વરા ।
ગાયગામ્ભીર્યમાધુર્યા ગાયમાધુર્યવાગ્વરા ॥ ૧૦॥

નમસ્તે તુહિને ગઙ્ગે નીહારમયનિર્ઝરિ ।
ગઙ્ગાસહસ્રવાગ્રૂપે નમસ્તે માનસાલયે ॥ ૧૧॥

મઙ્ગલં પુણ્યગઙ્ગે તે સહસ્રશ્લોકસંસ્ફુરે ।
સહસ્રાયુતસત્કીર્તે સત્ત્વસ્ફૂર્તે સુમઙ્ગલમ્ ॥ ૧૨॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા કૃતં
શ્રીગઙ્ગાદશકં ગુરૌ સમર્પિતમ્ ।
ૐ શુભમસ્તુ ।

Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

---

*Shri Gangadashakam*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on June 22, 2021
Please send corrections to *sanskrit@cheerful.com*